11

शि. प्र. मंडळी, पुणे ९.
मीमांसा विद्यालय
卐 ग्रंथालय 卐
ग्रंथ नाव श्री महागणपति पंचावरण स्तोत्रम्
लेखक [लिखित पत्रे ४]

म२४:४९७
*
८९

श्रीगणेशायनमः ॥ सृष्टिस्थित्यवहाराणांविश्वस्यास्यैककारणं ॥ महा
गणपतिंस्तोष्येपंचावरणसंयुतं ॥ १ ॥ क्रीडासक्तगणाधीशाकरसीकरपुंजितं ॥ ऐक्ष
वांभोनिधिंवंदेतरंगशतसंकुलं ॥ २ ॥ तस्यमध्येद्वीपवर्यंनौमिरत्नशिलामयं ॥ सेवाग
तामराधीशदैत्यदानवसंकुलं ॥ ३ ॥ पारिजातकसंतानमंदारहरिचंदनान् ॥ संक
ल्पवृक्षान्तत्रस्थान्नौम्यभीष्टफलप्रदान् ॥ ४ ॥ तेषांलसन्मरकतप्रवालमणिव
ज्रतः ॥ पलाशपल्लवफलप्रसूनैश्चऋतूद्भवैः ॥ ५ ॥ युगपत्सेव्यमानस्यमहतः

कल्मषापहारिणः ॥ अधस्तात्कौमुदीबालातपाभ्यां संकुले स्थले ॥ ६ ॥ रत्नवेदीं भजे
पूर्णकुंभदीपोपशोभितां ॥ रुसद्वितानसंयुक्तां चतुस्तंभविराजितां ॥ ७ ॥ तत्रध
र्मादिसिंहास्यचतुष्पादसमन्वितं ॥ अर्चयामि विभोः पीठमधर्माद्युपशोभितं ॥ ८
तन्मध्ये लिपिसंयुक्तं दलाष्टकमनोहरं ॥ षट्कोणचक्रमध्यस्थं त्रिकोणांकित
कर्णिकं ॥ ९ ॥ वृत्तभूवलयोपेतं विलसत्केसरान्वितं ॥ तीव्राचंज्वालिनीनंदा
भोगदा कामरूपिणी ॥ १० ॥ उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी ॥ किं
जल्ककर्णिकासीना यास्ताः शोणांगवाससः ॥ ११ ॥ वंदे वराभयकराः पीठशक्ति

गणेशितुः॥ सर्वशक्त्याख्यकमलं पूजयाम्यासनात्मकं॥१२॥ त्रिकोणकर्णि
कांतस्थं सुखासीनं सुरार्चितं॥ जपाकुसुमसंकाशमूर्तिंरंजितदिङ्मुखं॥१३॥
गजाननं जगद्वंद्यं तुदिलं चंद्रशेखरं॥ एकदंतं त्रिनयनं नागयज्ञोपवीतिनं॥
१४॥ रक्तमाल्यांचरधरं रक्तगंधानुलेपनं॥ फणामणिलसद्भोगभोगिभूभूषि
तं॥१५॥ रमाविष्ण्वादिमिथुनैरलंकृतविग्रहं॥ वामनांघ्रिकरांभोजं दश
दोर्दंडमंडितं॥१६॥ दक्षवामकराग्रेषु बीजापूरं गदां धनुः॥ ऐक्षवं त्रिशिखं चक्रं

२ कमलं पाशमुत्पलं ॥ १७ ॥ कलमाग्रं स्वरदनं पुष्करे कलशं शुभं । दधानं कलशस्था
निनानारत्नानि सर्वदा ॥ १८ ॥ विकिरंतं हि भक्तेभ्यो विरलं स्वकृतधारया ॥ गंडस्थले
गलद्दानगंधलुब्धाननुमुहुर्मुहुः ॥ १९ ॥ निवारयंतं मधुपान्कर्णतालविघट्टनैः ॥
महागणपतिं वंदे वरदं शक्तिसंयुतं ॥ २० ॥ वामांके गणनाथस्य सुखासीनां सुरार्चि
तां ॥ करेण पतिमालिंग्य दक्षिणेनेतरेण तु ॥ २१ ॥ बिभ्रतीं कुल्लकमलं रूपाविष्
कृतवीक्षणां ॥ दिव्यमाल्यांबरधरां दिव्यरत्नविभूषितां ॥ २२ ॥ साधकाभीष्टस
र्वार्थसिध्धिदानैकतत्परां ॥ गौरीं गणनाथस्य शक्तिं भक्त्याभिवादये ॥ २३ ॥
अथ बिल्वतरोर्मूले दिव्यसिंहासनस्थितौ ॥ विद्युन्निभांबुदनिभौ हि चतुर्भुजशालि
२

नौ ॥ २४ ॥ पद्मद्वयगदाखड्गशंखचक्रायुधान्वितौ ॥ श्वेतपीताम्बरौ दिव्यमाल्य
लेपनभुषणौ ॥ २५ ॥ रमारमेशौ संस्तौमी गणेशाभिमुखौ स्थितौ ॥ गणेशाद्दक्षिणेभागे
वटवृक्षस्थलाश्रितौ ॥ २६ ॥ त्र्यक्षौ सिंहासनासिनौ सुरासुरनमस्कृतौ ॥ हाटकस्फटि
कप्रख्यौ मृगबाहुचतुष्टयौ ॥ २७ ॥ पाशांकुशवराभीतिदिव्यशूलपरश्वधौ ॥ दिव्यांशुका
लेपमाल्यभूषणाविंदुशेखरौ ॥ २८ ॥ गणेशाभिमुखासीनौ नौम्युमावृषभध्वजौ ॥ गणे
शापृष्ठभागस्थौ बोधिवृक्षस्थलाश्रितौ ॥ २९ ॥ दिव्यसिंहासनासीनौ हेमविद्रुमसंनि
भौ ॥ दिव्यांशुकालेपमाल्यभूषणौ द्विद्विदोर्लतौ ॥ ३० ॥ गणेशाभिमुखासिनौ प्रलौ
निरतिमन्मथौ ॥ गणेशवामभागस्थौ प्रियंगुद्रुममूलगौ ॥ ३१ ॥ नीलोत्पलनिभौ दि

व्य

२ व्यसिंहासनसमाश्रितौ ॥ श्वेत पीतांबरौ दिव्यमाल्यलेपनभूषणौ ३२ ॥ गणेशा
भिमुखासीनौ द्विचतुर्भुजशालिनौ ॥ शुक वृक्षिस्यग्रचक्राब्जगदाभीतिवरान्वितौ
॥ ३३ ॥ आधारभूतौ भूतानां भूवराहौ समाश्रये ॥ षट्कोणसंस्थानामोदप्रमोदमुख
वि दुर्मुखान् ॥ ३४ ॥ अघ्नविघ्नकर्तृंश्च गणेशाभिमुखस्थितान् ॥ शोणांगान् शुक्ल माल्यांश्च
त्रिनेत्रान् भोगिभूषणान् ॥ ३५ ॥ ध्यादि शक्तिसहितान् गजवक्त्रांश्चतुर्भुजान्
॥ पाशांकुशवरा भीतिहारस्तान् वैदधतो भजे ॥ ३६ ॥ सिद्धिः संमृधिश्च तथाकां श्री
तिश्च मदनावती ॥ मदद्रवा द्राविणी ति षहामोदादिशक्तयः ॥ ३७ ॥ यास्ताश्श्यामी
कर निभाः संफुल्लांबुजधारिणीः ॥ दिव्याभरणमाल्यानुलेपनांस्रुकभूषणाः

श्री

॥३८॥ निजेशांकस्थितास्सर्वाः सिद्धिदाः शरणं भजे ॥ गणेशोभयपार्श्वस्थौ मुक्ता
माणिक्यसंनिभौ ॥३९॥ सदादानानि वर्षंतौ स्वशक्तिभ्यां समन्वितौ ॥ वसुंधरावसु ध
मतीशंखपद्मनिधीश्रये ॥४०॥ वन्हीशरक्षवायव्यदिक्कुस्थान्यगानि षड्विभोः ॥ हृ
दयादीनि प्रसन्नानि नानावर्णाङ्कितानि च ॥४१॥ स्वहेतिवाहनस्थानि नतिमुद्रा
णि संश्रये ॥ दिव्यमाल्याम्बरालेपाः पृथग्वर्णा नानाकृतीः ॥४२॥ स्वहेतिवाहनोपेताः
स्तौमि ब्राह्म्यादि मातृकाः ॥ प्रागादि दिक्पतीन् स्वस्वहेतिवाहनसंयुतान् ॥४३॥
दिव्यमाल्याम्बरालेपान् नानारत्नविभूषितान् ॥ नानाविधाकृतीन् सौम्यान् इन्द्रादीन्
शरणं व्रजे ॥४४॥ चतुश्चत्वारिंशत्परिगणितपद्यैर्विरचितं गणेशस्तोत्रं यः पठ

२ तिनियमनात्मासलभते॥ धनंधान्यंपुत्रान्नृपजनवाहिरयंपशुचयंचिरायुः सद्भिर्द्यां

चिपुलतर कीर्त्तिंशिवपदं॥ १५॥ चतुश्चत्वारिंशत्परिगणनयेनप्रतिदिनंजपेद

एद्रव्यैर्गणपतिसमाराधनपरः॥ चतुश्चत्वारिंशत्दिवसमितिजप्त्वाहिलभते॥

सकृत्स्नानिष्टार्थानभिमतदिनेष्वेवसुलभान्॥ १६॥ नारिकेलफलंलाजानूमोद कदलि

कान्पृथुसत्कुतिलेक्षून॥ संनिवेश्यपरितर्प्यगणेशंमन्त्रमेतदुभयंप्रजपेच्च॥ १७

इतिश्रीमतपरमहंसपरिव्राजकाचार्यश्रीमत्संकराचार्यविरचितंश्रीमहागा

णपतिपंचाचामरस्तोत्रंसंपूर्णं

८८